# ४० चत्वारिंश दशकः - प्रार्थना

आद्येति विद्येति च कथ्यते या या चोदयेद्बुद्धि मुपासकस्य ।
ध्यायामि तामेव सदाऽपि सर्व चैतन्यरूपां भवमोचनीं त्वाम् ॥ ४०-१॥

प्रतिष्ठिताऽन्तःकरणेऽस्तु वाङ्मे वदामि सत्यं न वदाम्यसत्यम् ।
सत्योक्तिरेनं परिपातु मां मे श्रुतं च मा विस्मृतिमेतु मातः ॥ ४०-२॥

तेजस्वि मेऽधीत मजस्र मस्तु मा मा परद्वेष मतिश्च देवि ।
करोमि वीर्याणि समं सुहृद्भिः विद्या परा साऽवतु मां प्रमादात् ॥ ४०-३॥

त्वं रक्ष मे प्राण शरीर कर्म ज्ञानेन्द्रियान्तः करणानि देवि ।
भवन्तु धर्मा मयि वैदिकास्ते निराकृति र्माऽस्तु मिथः कृपार्द्रे ॥ ४०-४॥

यच्छ्रूयते यत्खलु दृश्यते च तदस्तु भद्रं सकलं यजत्रे ।
त्वां संस्तुव न्नस्त समस्त रोग आयुः शिवे देवहितं नयानि ॥ ४०-५॥

अविघ्नमाया त्विह विश्वतो मे ज्ञानं प्रसन्ना मम बुद्धिरस्तु ।
नावेव सिन्धुं दुरितं समस्तं त्वत्सेवयै वातितरामि देवि ॥ ४०-६॥

उर्वारुकं बन्धनतो यथैव तथैव मुच्येय च कर्मपाशात् ।
त्वां त्र्यम्बकां कीर्तिमतीं यजेय सन्मार्गतो मां नय विश्वमातः ॥ ४०-७॥

क्षीणायुषो मृत्युगतान् स्वशक्त्या दीर्घायुषो वीतभयान् करोषि ।
सङ्गच्छतः संवदतश्च सर्वान् परोपकारैक रतान् कुरुष्व ॥ ४०-८॥

मर्त्यो ह्यहं बालिश बुद्धि रेव धर्मा नभिज्ञो ऽप्यपराध कृच्च ।
हा दुर्लभं मे कपि हस्त पुष्प सुमाल्यवच्छीर्ण मिदं नृजन्म ॥ ४०-९॥

यथा पथा वारि यथा च गौः स्वं वत्सं तथाऽऽधावतु मां मनस्ते ।
विश्वानि पापानि विनाश्य मे यत् भद्रं शिवे देहि तदार्ति हन्त्रि ॥ ४०-१०॥

बहूक्तिभिः किं विदितस्त्वयाऽहं पुत्रः शिशुस्ते न च वेद्मि किञ्चित् ।
आगच्छ पश्यानि मुखारविन्दं पदाम्बुजाभ्यां सततं नमस्ते ॥ ४०-११॥